दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णतृतीया
चैत्र 22 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-163 | 1 | अप्रैल 05, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 दुग्धोत्पादकेभ्यः प्रतिमासं ३४.१८ कोटिरूप्यकाणां वित्तीयलाभः, कृषकान् वित्तीयरूपेण सशक्तिकरणं प्रदेशसर्वकारस्य सर्वोच्चप्राथमिकता अस्ति - मुख्यमंत्री

3 सप्तमदिनाङ्कात् पूर्वं आगमिष्यति पञ्चायत- आरक्षणतालिका, सप्ताहपर्यन्तं निर्वाचन- आचारसंहितायाः अनुमानम्

4 मृत्तिकायाः मोहः रामदीनस्य संघर्षगाथा


## केरलम् राज्यस्य जनानां सुरक्षां तस्य सर्वकारस्य सर्वोच्चप्राथमिकता अस्ति- प्रधानमन्त्री



प्रधानमन्त्री तथा भाजपेति दलस्य वरिष्ठः नेता नरेन्द्रमोदी अवदत् यत् भारतीयानां, विशेषतः मध्यपूर्वस्य केरलम् राज्यस्य जनानां सुरक्षां तस्य सर्वकारस्य सर्वोच्चप्राथमिकता अस्ति। सः तिरुवल्ला-नगरे एन्. डी. ए. निर्वाचन प्रचारस्य भागत्वेन जनसभां सम्बोधयन् आसीत्। श्रीमोदी अवदत् यत् गल्फ्-देशैः सह सर्वकारस्य दृढसम्बन्धाः एतेषु दुष्करसमये तत्र भारतीयानां रक्षणाय साहाय्यं कुर्वन्तः सन्ति। सः अग्रे अवदत् यत् केरलम् ऐतिहासिक परिवर्तनस्य कृते सज्जम् अस्ति तथा च एन्. डी. ए. इत्यत्र जनानां अपरिमितः विश्वासः सम्पूर्ण राज्ये दृश्यते। महिला-सशक्तीकरणं एन्. डी. ए-दलस्य प्राधान्यम् अस्ति तथा च महिलाः तस्य नीतिभिः सर्वाधिकं लाभम् अवाप्नुवन् इत्यपि सः अवदत्। श्रीमोदी, एल्. डी. एफ्. तथा यू. डी. एफ्. इत्येतयोः अपि निन्दाम् अकरोत्, यत् उभौ पक्षौ दीर्घकालं यावत् राज्यस्य अवहेलनं कृतवन्तः इति आरोपयन्, तस्य सर्वकारस्य अधीने केरलम्-राज्येन पूर्वकालस्य अपेक्षया पञ्चगुणितोप्यधिकानि धनानि प्राप्तानि इति उक्तवान्। तिरुवल्ला-सार्वजनिक-क्रीडाङ्गणे आयोजिते कार्यक्रमे एन्. डी. ए. दलस्य प्रत्याशिनः वरिष्ठ नेताः च उपस्थिताः भवन्ति।

## ईरानेन संयुक्त राज्य अमेरिका-देशस्य अष्ट चत्वारिंशत् होरायाः शान्ति-प्रस्तावं निराकृतम्



ईरानेन संयुक्त राज्य अमेरिका-देशस्य अष्ट चत्वारिंशत् होरायाः शान्ति-प्रस्तावं औपचारिकतया निराकृतम्। पश्चिम-एशिया-प्रदेशे वर्धमानस्य संघर्षस्य मध्ये तेहरान नगरस्य दृढं मनोभावं प्रकाशयन्त्या एषा अस्वीकृतिः क्षेत्रे अधिक अस्थिरतायाः आशङ्कां वर्धयति। एषः प्रस्तावः तृतीय-देशस्य माध्यमेन प्रेषितः आसीत्, परञ्च तेहरान नगरम् विरामम् अस्वीकृत्य स्थलीय-स्तरे अभियानं तीव्रतरं कृतवान्। अस्य निराकरणस्य विषये संयुक्त राज्य अमेरिका-देशात् काचित् सार्वजनिक-टिप्पणी अधुना पर्यन्तं न प्राप्ता।

## वर्तमानस्थितिः केवलं परिस्थितिजन्या नास्ति, अपि तु संरचनात्मिकापि अस्ति, यतः विश्वव्यवस्थायां महत्त्वपूर्णानि परिवर्तनानि आनयति - विदेशमंत्री



विदेशमन्त्री डॉ. एस. जयशङ्करः अवदत् यत् वर्तमानस्थितिः केवलं परिस्थितिजन्या नास्ति, अपि तु संरचनात्मिकापि अस्ति, यतः विश्वव्यवस्थायां महत्त्वपूर्णानि परिवर्तनानि आनयति। आईआईएम रायपुरस्य पञ्चदशे दीक्षान्तसमारोहे सम्बोधयन् डॉ. जयशङ्करः अवदत् यत् राष्ट्राणां सापेक्षशक्तौ प्रभावे च परिवर्तनानि दृश्यन्ते। तेन उक्तं यत् समाजस्य काषाञ्चित् राजनैतिकव्यवस्थाः एतेषां परिवर्तितस्वरूपाणां अनुकूलनं कर्तुं काठिन्यम् अनुभवन्ति। मन्त्री एतस्मिन् विषये प्रतिपादितवान् यत् प्रौद्योगिकी, ऊर्जा, सैन्यक्षमताः, सम्पर्कः संसाधनानि च इत्येषु क्षेत्रेषु तीव्रप्रगत्या, द्रुतं प्रतिस्पर्धायुक्ते वैश्विकपर्यावरणे प्रत्याह्वानग्रहणस्य प्रवृत्तिः वर्धिता अस्ति। तेन उक्तं यत् विभिन्नक्षेत्राणाम् अधुना लाभः उपयुज्यते, केषुचित् सन्दर्भेषु तेषां शस्त्रीकरणमपि क्रियते। विदेशमन्त्रिणा भारतीयमत्स्यजीविनां प्रत्यर्पणाय अरमेनिया सर्वकारस्य धन्यवादः कृतः।

## चतुर्षु राज्येषु, एकस्मिन् केन्द्रशासितप्रदेशे च विधानसभा निर्वाचनस्य प्रचारः तीव्रः अभवत्



चतुर्षु राज्येषु, एकस्मिन् केन्द्रशासितप्रदेशे च विधानसभा निर्वाचनस्य प्रचारः तीव्रः अभवत्। अप्रैल-मासस्य नवमे दिनाङ्के विधानसभानिर्वाचनात् प्राक् केरलम्-राज्ये उच्चतर निर्वाचन-प्रचारः दृश्यते। रजनैतिक-दलानां प्रमुखाः राष्ट्रियनेतारः सम्पूर्णे राज्ये प्रमुखेषु निर्वाचनक्षेत्रेषु निर्वाचन-सभानां नेतृत्वं कुर्वन्ति। सोमवासरे नामाङ्कन प्रक्रियायाः समाप्तेः अनन्तरम्, प्रधानमन्त्री तथा भाजपेति दलस्य वरिष्ठः नेता नरेन्द्रमोदी चेन्नई-नगरे राज्य-भाजपा-दलस्य वरिष्ठनेतृभिः सह चर्चाम् अकरोत्।

## सुभाषितम्

**यौवनं जरया ग्रस्तमम्, आरोग्यं व्याधिभिर्हतम्। जीवितं मृत्युरभ्येति, तृष्णैका निरुपद्रवा।।**

भावार्थः- यौवन को वृद्धावस्था नष्ट कर देती है, स्वास्थ्य का नाश विभिन्न व्याधियां कर देती हैं। किसी भी प्रकार जीवन को समाप्त करने के लिए मृत्यु सदैव तत्पर रहती है, परन्तु मनुष्य में व्याप्त अकेली एक तृष्णा ऐसी है जो कि हर प्रकार के उपद्रवों से सदैव सुरक्षित रहती है।






सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति


कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यावाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## उत्तरप्रदेशस्य आरक्षकैः आई.एस.आई. आतंकि-समूहस्य लखनऊतः चत्वारः सन्दिग्धाः गृहीताः, ये रेल-स्थानकैः सह महत्त्वपूर्णेषु स्थानेषु विस्फोटं कर्तुम् तत्पराः आसन्



उत्तरप्रदेशस्य आरक्षकैः आई.एस.आई. आतंकि-समूहस्य लखनऊतः चत्वारः सन्दिग्धाः गृहीताः, ये रेल्-स्थानकैः सह महत्त्वपूर्णेषु स्थानेषु विस्फोटं कर्तुम् तत्पराः आसन्। यू.पी.आरक्षकस्य भयोत्पादन-विरोधी-दलस्य अनुसारं, मेरठ-नगरस्य निवासिनः साकिब अथ डेविड्, अरबाबः, विकास गहलोतः, लोकेशः च चत्वारः शङ्किताः, गौतमबुद्धनगरस्य निवासिनः गृहीताः। रेल-सङ्केतपेटिकासु, जनसम्मर्दस्थानेषु, गैस्-सिलिण्डर्-युक्तेषु वाहनेषु, प्रतिष्ठितेषु आयोजनस्थलेषु च विस्फोटं कृत्वा आतङ्कं जनयितुं समूहस्य योजना आसीत्, तेषां प्रथमं लक्ष्यम् लखनऊ-रेलस्थानकम् आसीत्। क्षौरकः साकिव इत्येषः समूहस्य प्रमुखः आसीत्, तथा च सः टेलिग्राम्, इन्स्टाग्राम् इत्यादिभिः सामाजिकान्तर्जालीय-मञ्चानां माध्यमेन स्वस्य पाकिस्तानी-निर्वाहकैः सह सम्पर्के आसीत्

## उपराष्ट्रपतिः मोतिहारी-नगरस्य महात्मा गान्धी-केन्द्रीय-विश्वविद्यालयस्य तृतीय-दीक्षान्त समारोहं सम्बोधितवान्



उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः, शिक्षायाः परिवर्तनशीलशक्तिं, "विकसितभारतं" प्रति यात्रायां तस्य महत्त्वपूर्णां भूमिकां च प्रकाशितवान्। मोतिहारी-नगरस्य महात्मा गान्धी-केन्द्रीय-विश्वविद्यालये तृतीय-दीक्षान्त समारोहं सम्बोधयन्, सः छात्रान् देशम् सम्मुखीभूयमानानां समाह्वानानां निवारणार्थं स्वज्ञानस्य उपयोगाय आदिष्टवान्।

## पैरा- धनुष्क्रीडा

भारतीय-धनुष्क्रीडकः श्याम्-सुन्दर-स्वामी बैङ्काक-नगरे विश्व-धनुष्क्रीडायां पैरा-श्रृङ्खलायां पुरुषाणां कम्पौण्ड्-व्यक्तिगत स्पर्धायां कांस्यपदकं विजितवान्।

# दुग्धोत्पादकेभ्यः प्रतिमासं ३४.१८ कोटिरूप्यकाणां वित्तीयलाभः, कृषकान् वित्तीयरूपेण सशक्तिकरणं प्रदेशसर्वकारस्य सर्वोच्चप्राथमिकता अस्ति - मुख्यमंत्री




**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः कुशलनेतृत्वे प्रदेशसर्वकारः ग्रामीण अर्थव्यवस्थां सुदृढीकर्तुं निरन्तरं प्रयासरतः अस्ति, यस्मिन् कृषकेषु दुग्धोत्पादकेषु च विशेषं ध्यानं दीयते। अस्योद्देश्यं दुग्धव्यवसायं ग्रामीणपरिवाराणां कृते एकं विश्वसनीयं लाभदायकं च आयस्रोतः निर्माणम् अस्ति। ग्रामीण अर्थव्यवस्थायाः सुदृढीकरणाय प्रदेशसर्वकारः राज्यस्य दुग्धोत्पादकान् वित्तीयरूपेण सशक्तान् करोति। अस्मिन् क्रमे प्रदेशस्य दुग्धोत्पादकेभ्यः औसतन ३४.१८ कोटिरूप्यकाणां प्रतिमासं वित्तीयलाभः प्रदीयते, यः अधुना यावत् सर्वाधिकः लाभः अस्ति। वर्षे २०२४-२५ मध्ये प्रतिदिनं १.५७ लक्षलीटरपरिमितस्य औसततुलनायां वर्तमाने हिमाचलप्रदेशराज्यसहकारीदुग्धोत्पादकसङ्घलिमिटेड् (मिल्कफेड) इत्यनेन प्रतिदिनं प्रायः २.७० लक्षसेटकपरिमितं दुग्धं क्रीणाति। सर्वकारस्य प्रयासैः इयं उल्लेखनीयवृद्धिः दर्शिता अस्ति।

'मिल्कफेड्' इत्यनेन गृहं-गृहं गत्वा दुग्धसङ्ग्रहणं सुनिश्चितं क्रियते, येन दूरस्थक्षेत्रेषु निवसन्तः दुग्धोत्पादकाः विशेषरूपेण लाभान्विताः भवन्ति। सर्वकारस्य अनेन पदेन कृषकेभ्यः प्रत्यक्षं आर्थिकसहायता प्राप्यते, येन ते सामाजिक-आर्थिकदृष्ट्या सुदृढाः भवन्ति। राज्यसर्वकारेण दुग्धक्रयणमूल्ये ऐतिहासिकवृद्धिं कृत्वा कृषकाणां सक्षमीकरणाय अनेकानि पदानि उत्थितानि। वर्षे २०२६-२७ तमस्य वर्षस्य आयव्ययके (बजट्) गोदुग्धस्य क्रयणमूल्यं ६१ रूप्यकाणि प्रतिसेटकं तथा महिषीदुग्धस्य क्रयणमूल्यं ७१ रूप्यकाणि प्रतिसेटकं निर्धारितम् अस्ति। एतेषां प्रयासानां परिणामतः विगतत्रिषु वर्षेषु ग्रामदुग्धसमितीनां सदस्यसंख्या २७,४९८ तः वर्धित्वा ३९,७९० संजाता। अपि च ग्रामदुग्धसहकारीसमितीनां संख्या ५८३ तः वर्धित्वा ७५८ अभवत्। जीविकासृजनं दुग्धसङ्ग्रहणं च प्रोत्साहयितुं दुग्धोत्पादकसमूहानां महिलास्वयंसहायतासमूहानां च अपि सङ्घटनम् क्रियते। डेयरी-अधोसंरचनां सुदृढीकर्तुं राज्यसर्वकारेण बहूनि दृढपदानि स्वीकृतानि। वर्तमाने सङ्घद्वारा प्रतिदिनं १.८० लक्षसेटकक्षमतायाः ११ दुग्धसंसाधनसंयन्त्राणि (Processing Plants) चाल्यन्ते। एतदतिरिच्य काङ्गड़ाजनपदस्य 'ढगवार' स्थाने प्रतिदिनं १.५० लक्षसेटकक्षमतायाः अत्याधुनिकं दुग्धसंसाधनसंयन्त्रं स्थाप्यते। अस्य क्षमता प्रतिदिनं ३ लक्षसेटकपरिमितं यावत् वर्धयितुं शक्यते।

डेयरीक्षेत्रे सहकारितां वर्धयितुं राज्यसर्वकारेण राष्ट्रियडेयरीविकासबोर्ड (NDDB) इत्यनेन सह एकः सन्धिपत्रं (MoU) हस्ताक्षरितम्। अस्याः सहभागितातः काङ्गड़ाजनपदे एकः नवीनः 'दुग्प्रमात्रकः' स्थापितः भविष्यति। अनेन काङ्गड़ा, ऊना, हमीरपुरं चम्बा च जनपदानां दुग्धोत्पादकाः लाभान्विताः भविष्यन्ति। सर्वकारस्य अनेन पदेन दुग्धसङ्ग्रहणं, प्रसंस्करणं विपणनप्रणाली च अधिका सुदृढा भविष्यति। डेयरीक्षेत्रस्य नवीनतकनीकीनां नवाचाराणां च विषये कृषकान् अवगतं कारयितुं विगतत्रिषु वर्षेषु २००० तः अधिकाः कृषकाः विभिन्नसंस्थानां सहयोगेन प्रशिक्षिताः। अतिरिक्तम्, अस्मिन् क्षेत्रे पारदर्शितां सुनिश्चितं कर्तुं २२२ स्वयंचालित- दुग्धसङ्ग्रहण- घटकाः, ३२ डेटा-प्रोसेसिंग दुग्धसङ्ग्रहणाघटकाः स्थापिताः सन्ति।

सुखविन्दरसिंहसुक्खुमहोदयेन उक्तं यत् कृषकान् वित्तीयरूपेण सशक्तिकरणं प्रदेशसर्वकारस्य सर्वोच्चप्राथमिकता अस्ति। सः अवदत् यत् कृषकाणाम् उद्यानकृषकाणां (Horticulturists) च कृते सर्वसंभवं सहयोगं दातुं प्रदेशसर्वकारः कटिबद्धः अस्ति। ग्रामाः, कृषकाः, महिलाः ग्रामीणयुवानः च केन्द्रबिन्दौ स्थापयित्वा राज्यस्य अर्थव्यवस्थायाः सुदृढीकरणमेव प्रदेशसर्वकारस्य मुख्यं लक्ष्यम् अस्ति।

# निर्वाचन-आयोगेन पश्चिमबङ्गालराज्ये मतदातृणां सौलभ्यं साधयितुं षष्ठ्यधिक-षट्शताधिकचतुःसहस्र सहायक-मतदातृकेन्द्राणां निर्माणम् अनुमोदितम्



निर्वाचन-आयोगेन पश्चिमबङ्गालराज्ये मतदातृणां सौलभ्यं साधयितुं षष्ठ्यधिकषट्शताधिकचतुः सहस्र सहायक मतदातृकेन्द्राणां निर्माणम् अनुमोदितम्, यत्र मतदातृ सङ्ख्या द्वादश-शताधिका अभवत्। मतदातृणां सुलभतायै एकविंशत्यधिक त्रिशत-मतदातृ-केन्द्राणां स्थानान्तरणम् अपि आयोगेन अनुमोदितम्। पश्चिमबङ्गालराज्ये सहायक मतदानकेन्द्रैः सह मतदानकेन्द्राणां सङ्ख्या अधुना प्रायः सार्द्ध पञ्चाशीतिः अस्ति। निर्वाचन आयोगेन अस्मिन् विषये राज्यस्य मुख्य निर्वाचन-अधिकारिणां कृते पत्राणि लिखितानि।

# भारतीयध्वजाङ्कितम् एलपीजी-इत्यनेन युक्तं "ग्रीन सानवी" जलयानं युद्ध ग्रस्तं क्षेत्रं होर्मुज-जलसंधि-क्षेत्रं सुरक्षितरूपेण तीर्त्वा स्वदेशं प्रत्यागच्छति



भारतीयध्वजाङ्कितम् एलपीजी-इत्यनेन युक्तं "ग्रीन सानवी" जलयानं युद्ध ग्रस्तं क्षेत्रं होर्मुज-जलसंधि-क्षेत्रं सुरक्षितरूपेण तीर्त्वा स्वदेशं प्रत्यागच्छति। प्रशासनिक सूत्रानुसारं पश्चिम-एशिया-संघर्षस्य मध्ये होर्मुज जलसंधि-क्षेत्रं तीर्त्वा गच्छन् एषः सप्तमः भारतीय-एलपीजी इत्यनेन युक्तं वाहनम् अस्ति। पश्चिम-फारस-खाडी-प्रदेशे अधुना सप्तदशसु भारतीयध्वजाङ्कितेषु जलपोतेषु चतुःशताधिकाः भारतीय-नाविकाः आरूढाः सन्ति । अद्यावधौ खाडी-प्रदेशात् त्रिंशताधिकैकादशाधिकशत भारतीय-नाविकानां सुरक्षितं स्वदेश-प्रत्यागमनं सम्पन्नम् ।

# हिमाचलप्रदेशे जलं, सिकता वा रासायनिकद्रव्यं न... अधुना ध्वन्या अपि वह्निः शमयितुं शक्यते, विद्यार्थिभिः उपकरणं निर्मितम्



**हिमसंस्कृतवार्ताः- शिमला।** राजकीय- पॉलिटेक्निक-महाविद्यालये सुन्दरनगरस्थे विद्युत-अभियांत्रिकी-विभागस्य प्रशिक्षार्थिभिः अभिनवः 'सोनिक- फायर-एक्सटिङ्ग्विशर' नामकः उपकरणः विकसितः, यः ध्वनि-तरङ्गानां साहाय्येन वह्निं शमयितुं समर्थः अस्ति। जलं, सिकता वा किञ्चित् रासायनिकद्रव्यं विना एषः उपकरणः वह्निनियन्त्रणं कर्तुं दावयति। संस्थानेन अस्य प्रौद्योगिक्याः उपयोगितां दृष्ट्वा अस्य पेटेण्ट-प्रक्रिया आरब्धा अस्ति। महाविद्यालयस्य षष्ठ-सत्रस्य प्रशिक्षार्थिभिः विकसितं एतत् उपकरणं विभागाध्यक्षः राजेश चौधरी महोदयः प्रशंसितवान्, अस्य संस्थानस्य कृते महत्त्वपूर्णा उपलब्धिः इति उक्तवान्। तस्य वचनम् अस्ति यत् एषा प्रौद्योगिकी भविष्ये अग्निशमन-क्षेत्रे महान् परिवर्तनम् आनयितुं शक्नोति।

प्रकल्पनेता रजतसिंहः अवदत् यत् महत्त्वपूर्णेषु विद्युत-पट्टिकायन्त्रेषु च वह्निदाहे सति पारम्परिक- उपायानां प्रयोगेन उपकरणानि पूर्णतया क्षतिग्रस्तानि भवन्ति। अस्य समस्यायाः समाधानार्थं दलं ध्वनि-आधारित-प्रौद्योगिक्यां कार्यं कृतवान्। सः अवदत् यत् अस्मिन् यन्त्रे विशेषः माइक्रो-कन्ट्रोलरः तथा प्रोग्रामिङ्ग-कोडः उपयुज्यते, यः निश्चित-आवृत्तेः ध्वनिं उत्पादयति। एषा ध्वनिः वह्नेः परितः ऑक्सीजन-संयोगं बाधते, येन वह्निः शम्यते। प्रायः सप्त- अष्ट- सहस्र- रूप्यक- मूल्येन एतत् उपकरणं पूर्णतया पर्यावरणानुकूलम् अस्ति, पुनः-पुनः पूरणस्य आवश्यकता न भवति।

अस्य उपकरणस्य चर्चा देशस्य प्रतिष्ठित-संस्थानेषु तथा वनविभागे अपि भवति। अनेकैः आईआईटी- संस्थाभिः महद्भिः कम्पन्यः च अस्मिन् आदर्शे रुचिः दर्शिता। स्थानीयस्तरे वन-विभागस्य अधिकारिणः महाविद्यालयं गत्वा अस्य अवलोकनं कृतवन्तः। प्रायः त्रि-पञ्च-किलोग्राम-भारयुक्तत्वात् एतत् उपकरणं दुर्गमेषु पर्वतीयप्रदेशेषु वनेषु च वह्निशमनाय उपयुक्तम् मन्यते। वर्तमाने वनेषु वह्नेः नियन्त्रणार्थं किमपि प्रभावी पोर्टेबल-उपकरणं न उपलब्धम्, अतः एषा स्वदेशी-प्रौद्योगिकी महत्त्वपूर्णं समाधानं भवितुं शक्नोति। एषा प्रौद्योगिकी तेषु संवेदनशील-स्थानेषु अपि उपयोगी भविष्यति, यत्र मानव-प्रवेशः कठिनः अस्ति।

विद्युत-अभियांत्रिकी-विभागस्य षष्ठसत्रस्य प्रशिक्षार्थिभिः स्वदलसहितं अस्मिन् प्रकल्पे कार्यं कृतम्। अस्य शोधस्य अधिक-उन्नयनार्थं भविष्ये आवश्यकाः आर्थिक-सहाय्याः तथा प्राविधिक- संसाधनानि महाविद्यालयस्य 'स्टूडेंट- वेलफेयर- फण्ड' माध्यमेन प्राथमिकतया प्रदास्यन्ते इति विभागाध्यक्षः राजेश चौधरी उक्तवान्।

'ऑटोमैटिक- सोनिक- वर्जन' इत्यस्य कृते पेटेण्ट-दस्तावेजः सज्जीकृतः भवति। वैश्विकस्तरे अस्यां दिशि किञ्चन शोधकार्यं कृतम् अस्ति, किन्तु भारतीय-परिस्थित्यनुसारं निर्मितः अयं सेन्सर- आधारितः पोर्टेबल-आदर्शः अद्वितीयः अस्ति। एषा प्रौद्योगिकी तेषां गृहेषु विशेषतः उपयोगी भविष्यति, यत्र वह्निदाहे सति कश्चन उपस्थितः न भवति। तादृशे सति एषः सेन्सर-आधारितः उपकरणः स्वतः सक्रियः भूत्वा वह्निं शमयितुं समर्थः भविष्यति इति प्रकल्पमार्गदर्शकः अवनीश पॉलः उक्तवान्।

# सप्तमदिनाङ्कात् पूर्वं आगमिष्यति पञ्चायत- आरक्षणतालिका, सप्ताहपर्यन्तं निर्वाचन- आचारसंहितायाः अनुमानम्




हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे पञ्चायतीराज-निर्वाचनाय अग्रिमा प्रक्रिया अधुना तीव्रा संजाता अस्ति। सर्वेषां जनपदानां उपायुक्ताः सप्तम-अप्रैल-दिनाङ्कात् पूर्वं नूतननियमानुसारं आरक्षण-तालिकां (रोस्टर) विज्ञापयिष्यन्ति। अधुना एतेषां कृते पञ्चायतीराजविभागाय प्रारूप निर्मीय प्रेषणस्य आवश्यकता नास्ति। उच्चन्यायालयस्य निर्णयानुसारं पञ्चायतीराजविभागेन गुरुवासरे एव रोस्टर-सम्बद्धानि नूतननिर्देशानि जनपदेभ्यः प्रेषितानि। यद्यपि इतः पूर्वं यदा आरक्षण-सूची- नियमेषु परिवर्तनं न जातम् आसीत्, तदा सर्वैः जनपदैः एकवारं प्रारूपं याचितम् आसीत्। अधुना प्रारूपप्रेषणस्य तादृशी कापि बाध्यता नास्ति। आरक्षण- तालिकायाः अन्तिमरूपं प्राप्नुवन् एव राज्य-चयन-आयोगस्य कार्यं प्रारप्स्यते। आयोगः पञ्चायत-निर्वाचनस्य समयसारिणीं (Schedule) घोषयिष्यति, येन सहैव निर्वाचन-आचारसंहिता प्रवृत्ता भविष्यति। अस्य प्रभावः राज्यसर्वकारस्य कार्यप्रणाल्यां अपि भविष्यति। इतः पूर्वं पञ्चायतानां पुनर्संरचनाविषये उच्चन्यायालयं प्रकरणे गते सति १६ ग्रामपञ्चायतेषु निर्वाचनं न भविष्यति। अधुना कुल ३७५७ पञ्चायतानां कृते आरक्षण-तालिका निर्गमिष्यति। आशा अस्ति यत् अप्रैल-मईमासे पञ्चायत-निर्वाचनस्य प्रक्रियां व्यतीतौ भविष्यतः। पञ्चायतीराजविभागः पुनः तदा सक्रियः भविष्यति, यदा जिलापरिषद्-पञ्चायतसमितीनां कृते अप्रत्यक्ष- निर्वाचनानि भविष्यन्ति। हिमाचलप्रदेशे सामान्यकार्यकालरूपेण पञ्चायत-निर्वाचनप्रक्रिया जनवरीमासे एव समारभ्या आसीत्, परन्तु आपदा-अधिनियमस्य (Disaster Act) प्रवर्तनात् इयं स्थगितीकृता आसीत्। अस्मिन् वारे आरक्षण- तालिकायाः कृते राज्यसर्वकारेण नियमेषु परिवर्तनं कृतम् अस्ति। अस्मिन् परिवर्तने विपक्षीदलेन भाजपापक्षेण आपत्तिः प्रकटीकृता। आयव्ययकसत्रस्य (Budget Session) समये अपि विपक्षीदलेन अस्य विरोधः कृतः। यद्यपि अद्यावधि आरक्षणनियमानां परिवर्तनं केनापि न्यायालये न आहूतं तथापि पूर्वानुभवान् दृष्ट्वा एतादृशी सम्भावना दृश्यते।

# नागाभूमौ संस्कृतभारत्याः गुरुत्वपूर्णा गोष्ठी

नयनज्योतिशर्मा, हिमसंसकृतवार्ता, डिमापुरम् ०४ अप्रैल २०२६ शनिवासरे सायं ०३ वादनादारभ्य ०४.१५ पर्यन्तम् कालीमन्दिरं, रेल्वे कालोनी डिमापुरम् इति स्थाने कार्यकर्तृमेलनं जातम्। गोष्ठ्यामस्यां रेल्वे स्कूल् इत्यस्य प्रधानाचार्यः, श्री स्वागतवर्यः, मुख्यः अतिथिरूपेण उपस्थितमासीत्। संस्कृतभारती,डिमापुर-नगरसंयोकः श्री पन्नागुहः, सह संयोजिके श्रीमती निशादासः, श्रीमती प्रीतिकादासः अन्ये च पञ्चषाः विशिष्ट-कार्यकर्तारः तत्र उपस्थिताः आसन्। कार्यक्रमेऽस्मित् अनागतकाले नागाभूमौ आयोजिष्ये संस्कृतकार्यक्रमाणांविषये केचन महत्वपूर्णाः निर्णयाः जाताः। तेषु आगामि जूनमासस्य अन्तिमे सप्ताहे श्री स्वागतवर्यस्य अध्यक्षतायाम् एका गोष्ठी आयोजयिष्यते।तत्र गुरुपूर्णिमा आचरणम्, १५ जूलाईतः २३ पर्यन्तं प्रचल्यमानस्य प्रशिक्षणवर्गविषये चर्चा भविष्यति। एवं प्रकारेण श्रीस्वागतवर्यस्य मार्गदर्शनेन आगामिनिकाले नागाभूमौ संस्कृतकार्ये नूतनं रूपं प्राप्स्यतीति तत्र उपस्थिताः कामयन् शान्तिमन्त्रेण गोष्ठ्याः समापनं कृतम्।




# HP WEATHER- हिमाचले 'श्वेत- आपत्तिः' अटल-कनवदरातः धुन्धी-पर्यन्तं शताधिकानि वाहनानि निरुद्धानि, आरक्षकैः चालितम् उद्धार- अभियानम्




हिमसंस्कृतवार्ताः- मनाली।हिमाचलप्रदेशस्य अटल-कनवदरायाः दक्षिण- प्रवेशद्वारात् सोलाङ्गनाला-पर्यन्तं हिमस्य श्वेतास्तरं प्रसारितं जातम्। मार्गे हिमस्य स्तरस्य सञ्चयात् प्रातः लाहौल-दिशं प्रति गतानि वाहनानि तत्रैव निरुद्धानि अभवन्। सायङ्काले हिमपातः तीव्रः अभवत्, येन वाहनानि मार्गे स्खलितुं (Skid) आरब्धवन्तः। मनालीनगरस्य आरक्षकदलेन उद्धार- अभियानं (Rescue Operation) चालयित्वा वाहनानां निष्कासनं प्रारब्धम्। मनाली-नगरस्य उप-आरक्षक-अधीक्षकः (DSP) के.डी. शर्मा स्वयं घटनास्थलं प्राप्तवान्।

**अटल-कन्दरा सामान्यवाहनानां कृते पिहिता**-यद्यपि आरक्षकैः अटल-कन्दरा सामान्यवाहनानां कृते पूर्वमेव पिहिता आसीत्, परन्तु प्रातःकाले ये पर्यटकाः सिस्सू-कोकसर-दिशं प्रति गताः आसन्, ते यदा सायङ्काले प्रत्यागच्छन्तः आसन्, तदा हिमपातः तीव्रः संजातः। वाहनानां स्खलनेन अटल-कन्दरायाः अन्तः अपि वाहनानां दीर्घा पङ्क्तिः जाता अस्ति। कन्दरातः आरभ्य 'हॉकी'-सेतुं यावत् महासङ्कुलस्य (Traffic Jam) स्थितिः उत्पन्ना।

**मनाली-दिशं प्रति प्रेष्यन्ते वाहनानि**-अटल-कन्दरायाः दक्षिण-प्रवेशद्वारात् धुन्धी-क्षेत्रं यावत् हिमपातेन पर्यटनार्थं निर्गतानां पर्यटकानां समस्याः वर्धिताः। आरक्षकदलं महता परिश्रमेण वाहनानि सुरक्षिततरूपेण निष्कास्य मनाली-दिशं प्रति प्रेषयति। उप-आरक्षक-अधीक्षकः के.डी. शर्मा स्वदलेन सह तत्रैव उपस्थितः अस्ति। प्रचण्ड-हिमपातस्य मध्ये पर्यटकाः बहिः निष्कास्यन्ते।

**सम्मर्द-समस्या**-मनाली-नगरस्य उप-आरक्षक-अधीक्षकः के.डी. शर्मा उक्तवान् यत् यदा पर्यटकानां वाहनानि कन्दरायाः दक्षिण-प्रवेशद्वारात् धुन्धी-दिशं प्रति आगन्तुं प्रवृत्तानि, तदा तानि स्खलितानि अभवन्। येन अत्र सङ्कुलस्य समस्या जाता। तथापि पर्यटकानां वाहनानि सुरक्षिततरूपेण निष्कास्यन्ते।

# असमराज्यं प्रति प्रस्थितः मुख्यमन्त्री सुक्खू, रविवासरे गुवाहाटीनगरे निर्वाचन-कार्यक्रमेषु भागं ग्रहीष्यति





हिमसंस्कृतवार्ताः- शिमला।मुख्यमन्त्री सुखविन्द्रसिंहसुक्खु महोदयः असमराज्ये आयोज्यमाने विधानसभा-निर्वाचने प्रचारार्थं गतवान् अस्ति। शनिवासरे अपराह्णे मुख्यमन्त्री शिमला-नगरात् चण्डीगढ़-नगरं प्रति मार्गमार्गेण (By Road) प्रस्थितः। चण्डीगढ़तः देहलीं प्रति सायङ्काले तस्य विमानयात्रा आसीत्।

रविवासरे प्रातः सः गुवाहाटी-नगरं प्राप्स्यति। तत्र निर्वाचन-कार्यक्रमान्, जनसभाः, वार्ताहरसम्मेलनं (Press Conferen च सम्बोधयितुं तस्य कार्यक्रमः निश्चितः अस्ति। काङ्ग्रेस-दलस्य सः असम-निर्वाचनार्थं मुख्यप्रचारकः ('स्टार प्रचारक') इति नियुक्तः।

दलस्य उच्चाधिकारिभिः निर्वाचनार्थं ४० नेतॄणां नामावली 'स्टार-प्रचारकाणां' सूच्यां सम्मिलिता कृता अस्ति। मुख्यमन्त्री असम-राज्यात् रविवासरे सायङ्काले अथवा ६ दिनाङ्कस्य प्रातःकाले प्रत्यागमिष्यति। ७ अप्रैल-दिनाङ्के सः शिमलानगरं प्राप्स्यति।

## संस्कृतं मधुरं सदा - २१

प्राणिनां जन्मस्थितिमृत्वादिकम् अस्मिन् भूतले जायते। स्कर्मानुसारं प्राणिनः विविधयोनिषु जन्म लभन्ते। तासां योनिषु उत्तमतमा योनिः मनुष्ययोनिः कथ्यते। दुर्लभतया हि जीवः मनुष्ययोनिं प्राप्नुयात्। मनुष्यस्य इतोऽपि दुर्लभतरं जन्म भारते कथ्यते। यतोहि भारतं प्राचीनमहर्षीणां वासभूमिः, तपोभूमिश्च। तस्मात् भारतम् अत्यन्तं पवित्रभूमित्वेन परिगण्यते परम्परया। श्रीभगवतः असकृद् अवतरणमपि अत्रैव समभवत्, अतः भारतं देवभूमित्वेन अपि मन्यते। भारते मनुष्यजन्म कीदृशम् इति विषयेऽत्र किञ्चिद् वर्णयितुं प्रयत्यते।

विष्णुपुराणे आयाति-

**अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने।**
**यतो हि कर्मभूरेषा ह्यतोऽन्या भोगभूमयः॥**

भारतं कर्मभूमिः वर्तते, इतरे पाश्चात्यादिदेशाश्चेत् भोगभूमयः आख्यायन्ते। अत्र मनुष्यो यत्किमपि शुभाशुभं कार्यं कुर्यात्, तस्य फलम् अन्यत्र भुञ्जीत। भारतभूमेः महिमा अनन्तः, अवर्णनीयश्च। अद्यापि श्रेष्ठपुरुषा देवा वा भारते जन्म लब्धुम् इच्छेयुः। यतोहि अक्षयं, निर्मलं, एवं शुभपुण्यफलं भारते सञ्चित्य परमपदं लब्धुं शक्येत। प्रोक्तमस्ति यत्-

**गायन्ति देवाः किल गीतकानि,**
**धन्यास्तु ते भारतभूमिभागे।**
**स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात्॥**

इति।

भारतम् ऋषिमहर्षीणां वासस्थलं वर्तते। अत्र परम्परया केवलं ज्ञान-भक्ति-सत्कर्मादिसम्बद्धा चर्चा अभवद्, भवति, भविष्यति च। 'वसुधैव कुटुम्बकम्' इत्येतादृशी उदात्तभावना अत्रैव उपलभ्यते। भोगविषयिणी भावना तु अत्र त्यज्यते। सदाचरणम्, आत्मचिन्तनं, भगवत्प्राप्तिः इत्यादिविषयाः हि अत्र प्रशस्यन्ते। ऋषभदेवमहर्षिणः पुत्रस्य भरतस्य नाम्ना हि नामाङ्कितः अयं भारतदेशः सर्वदा हि विश्वगुरुरूपेण **विश्वं प्रकाशमानोऽस्ति इत्यत्र नास्ति संशीतिः।**

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**



हिमसंस्कृतवार्ता
✍ असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

---




**रवींद्र कुमार शर्मा घुमारवीं**
**जिला बिलासपुर हि प्र**

## चरड़

पहल्के ज़माने बौहत हुन्दी थी चरड़
आदमी खुरखी खुरखी ने ई मरी जांदा था
कई खोट दोष समझदे थे चरड़ा जो
पर सच्च एह था पई माहणु कई रोज नी नौहन्दा था

पानी घट हुँदा था बड़े दूरा ते पौंदा था ल्यौणा
तांजे पीणे जो नी मिलणा तां रोज कियां नौहणा
साबण बी नी हुँदा था तिस ज़माने
कईयां दिनां बाद तां कुर्ता पजामा ई धोणा

बज्जी रियाँ ख़रीखड़ियाँ मैला री
नौहणे जो हुँदा नी था गुसलखाना
ताईं तां बोलदे थे फटाफट हुणा चाहिन्दा
मर्दा रा खाणा कने जनाना रा नौहणा

चरड़ा रा मतलब हुँदा था दाद,खुजली कने खाज
टूणे टोटके बी लोग थे अपणान्दे
चरड़ा रा नी था तिस ज़माने कोई लाज
कई लोग मंगल़ौता रे कुंडा बी थे नौहणे जांदे

कई लोग तातापाणी बी थे जांदे
उत्थी गर्म पाणिये कने थे नाहन्दे
तांजे खुरक लगदी थी ज़्यादा
तां लोकां रे सामणे शरमें थे मरी जांदे

वैद ई करदे थे चरड़ा रा थोड़ा बौहत लाज
कौड़े तेला च गंधक लाई कने मिटदी थी खाज
खुरखणे जो करी देंदी थी मजबूर
एह मुई चरड़ नी औंदी थी बाज

---

## "सुभाषितरसास्वादः"
## "सामान्यनीतिः"

श्लोकः-
"असारे खलु संसारे सारमेतच्चतुष्टयम्।
काश्यां वासः सतां सङ्गो गङ्गाम्भ शम्भुसेवनम्"

अर्थः- अस्मिन् तुच्छजगति वस्तुतः चत्वारि उत्तमवस्तूनि सन्ति। काशीनगर्याम् निवासः, सज्जनानां सङ्गतिः, गङ्गाजलस्य सेवनं, शिवार्चनञ्च।

गूढार्थः- अल्पैः शब्दैः सुभाषितकारेण मोक्षमार्गः उक्तः।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**



**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

## वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। रायपुरनगरे एकया क्षुद्रधान्य-पूपशालया द्विशतं महिलाः सशक्तीकृताः, ग्रामीणजीविका परिवर्तिता च।

**काव्या-** नमस्ते नन्दिनि। एतत् अतीव उत्तमं कार्यम्। महिलानां सक्षमीकरणं सर्वदा प्रशंसनीयम्। विहारराज्ये अपि बबिता-महोदयया तादृशम् एव अद्भुतं कार्यं कृतम्। तया त्यक्त-शिल्पजतुवस्तूनि धने परिवर्तितानि, सहस्र- ग्रामीण- महिलाभ्यः च वृत्तिः सृष्टा।

**नन्दिनी-** सत्यम्, एषा तु महती प्रेरणा। एतादृशैः यत्नैः एव देशः प्रगतिं प्राप्नोति। इदानीं चीनदेशस्य काचित् विचित्रा वार्ता श्रूयताम्। तत्रत्याभिः पानशालाभिः स्वास्थ्य-रक्षणाय मदिरापेयानां स्थाने औषधीय-पेयानि वितरितानि।

**काव्या-** हास्यकरं खलु एतत्! तत्रत्याः जनाः एतां नूतनां प्रथाम् आरब्धवन्तः सन्ति। इदानीम् अन्तिमाम् आह्लादिकां वार्तां शृणु। एकेन पुरुषेण पाकशालायां रुदन्त्याः गृहसेविकायाः जन्मदिनम् आचरितम्। अनेन सद्व्यवहारेण अन्तर्जाले तेन सर्वेषां मनांसि जितानि।




---



# मृत्तिकायाः मोहः
## रामदीनस्य संघर्षगाथा

एकः लघु ग्रामः आसीत् — 'हरितपुरम्'। तत्र रामदीनः नाम एकः सरलः कृषकः निवसति स्म। तस्य समीपे पैतृक-सम्पत्तिरूपेण पञ्च एकड-परिमितं क्षेत्रम् आसीत्, यत् सः केवलं भूखण्डं न, अपितु स्वस्य 'माता' इति मन्यते स्म। रामदीनस्य जीवनं सूर्यस्य प्रथमकिरणेन सह आरभ्यते स्म नक्षत्राणां छायायां च समाप्तं भवति स्म।

### कठोरपरिश्रमः आशा च

वर्षस्य द्वादशमासाः रामदीनस्य कृते विविधान् संघर्षान् आनयन्ति स्म। कदाचित् प्रचण्डातपे अनुलिप्तपादाभ्यां हलं चालनम्, तर्हि कदाचित् भीषणशीतकाले रात्रौ जागरित्वा सस्यानां जलसेचनम्। तस्य पत्नी सुमित्रा पुत्रः आकाशः च अपि तस्य अस्मिन् संघर्षे पूर्णं सहयोगं कुरुतः स्म।

### रामदीनः सर्वदा वदति स्मः

"पुत्र आकाश, यत् अन्नं वयं उत्पादयामः, तत् केवलं अस्माकं उदरपूर्तिं न करोति, अपितु देशस्य कस्मिंश्चित् अज्ञातकोणे उपविष्टस्य तस्य मनुष्यस्य अपि क्षुधां शमयति यं वयं कदापि न दृष्टवन्तः। दानं पोषणं च एव कृषकस्य परमधर्मः।"

प्रकृतेः परीक्षा- एकस्मिन् वर्षे वर्षाकाले वृष्टिः न अभवत्। सर्वत्र अनावृष्टिः (शुष्कता) अभवत्। भूमौ विदीर्णाः रेखाः जाताः। रामदीनः स्वस्य सर्वं धनं कूपखनने व्ययितवान्, किन्तु जलस्य एकं बिन्दुम् अपि न प्राप्तवान्। ऋणस्य भारः अवर्धत। ग्रामस्य बहवः जनाः नगरं प्रति प्रस्थिताः, किन्तु रामदीनः स्वमृत्तिकां न तत्याज।

अग्रिमे वर्षे अपेक्षया अधिका वृष्टिः अभवत्। सा वृष्टिः 'जलाप्लवस्य' (बाढ़) रूपं धृतवती। पक्वानि सस्यानि तस्य नेत्रयोः पुरतः जले प्रवाहीभूतानि। तस्यां रात्रौ रामदीनः न रुदितवान्, केवलं मौनेन स्थित्वा स्वस्य नष्टं परिश्रमं पश्यति स्म। सुमित्रा तं सान्त्वनां दत्तवती, "धैर्यं मा त्यजतु, इयं मृत्तिका पुनः स्वर्णं प्रसोष्यते।"

### संघर्षात् सफलतां प्रति-

रामदीनः पराजयं न स्वीकृतवान्। सः सर्वकारस्य 'नवीन-कृषि-नीतेः' विषये श्रुतवान्, नगरं गत्वा कृषि-विशेषज्ञैः सह परामर्शं कृतवान्। सः पारम्परिक-कृष्या सह 'जैविक-कृषिम्' (Organic Farming) तथा 'बिन्दु-सेचन-पद्धतिम्' (Drip Irrigation) अङ्गीकृतवान्। सः स्वक्षेत्रस्य लघौ भागे शाकानि फलानि च उत्पादितुम् आरब्धवान्। आरम्भः कठिनः आसीत्, किन्तु शनैः शनैः तस्य परिश्रमः सफलः जातः। तस्य सस्यानि विपण्याम् (Market) उच्चमूल्येन विक्रयणं जातानि, यतः तानि शुद्धानि रायाणिक-मुक्तानि च आसन्।

### शिक्षा सम्मानं च-

कतिपयवर्षेभ्यः परं रामदीनः न केवलं ऋणमुक्तः अभवत्, अपितु सः स्वपुत्रम् आकाशं नगरं प्रेषितवान् यथा सः आधुनिकतन्त्रज्ञानं शिक्षित्वा प्रत्यागच्छेत्। अद्य रामदीनस्य गृहं सुदृढं (पक्का) अस्ति, किन्तु सः अद्यापि प्रातः उत्थाय सर्वप्रथमं स्वक्षेत्रस्य मृत्तिकां ललाटे धारयति।

### कथासारः

कृषकस्य जीवनं केवलं हलचालनेन सीमितं नास्ति, सः धैर्यस्य, त्यागस्य, जीवटतायाः च प्रतीकः अस्ति। सः पराजितः भवति, पतति, प्रकृतेः प्रहारं सहते, किन्तु पुनः उत्तिष्ठति यतः सः जानाति यत् सम्पूर्णविश्वस्य भोजनस्थालिका तस्य परिश्रमस्य ऋणी अस्ति।

**शिक्षा-**: सत्यपरिश्रमेण सम्यक् दिशायां च कृतं कार्यं कदापि निष्फलं न भवति। परिवर्तनस्य स्वीकारः एव प्रगतेः मार्गः अस्ति।